# सौन्दर्यलहरी

जगद्गुरु श्री आदिशङ्कराचार्य विरचिता

सम्पादकः

ब्रह्मश्री सन्तोष कुमार घनपाठी

श्री कश्यप वेदविद्या मन्दिरम्

भाग्यनगरम्



श्रीमत्परमहंस परिव्राजकार्यवर्य

जगद्गुरु श्री आदिशंकर भगवत्पाद विरचित

# सौन्दर्य लहरी

श्री मन्महागणाधिपतये नमः, श्री महासरस्वत्यै नमः, श्री गुरुभ्यो नमः

गुरुर्ब्रह्मा गुरुर्विष्णुर् गुरुर्देवो महेश्वरः

गुरुस्साक्षात् परंब्रह्म तस्मै श्री गुरवे नमः

श्रुतिस्मृति पुराणानामालयं करुणालयम्

नमामि भगवत्पाद शंकरं लोकशंकरम्

सौंदर्यलहरी कर्त्रे सर्वमङ्गलदायिने

शङ्कराचार्यवर्याय यतिराजाय ते नमः

भूमौ स्खलित पादानां भूमिरेवावलंबनम्

त्वयि जातापराधानां त्वमेव शरणं शिवे

शिवश्शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्
न चेदेवन्देवो न खलु कुशलस्स्पन्दितुमपि
अतस्त्वामाराध्यां हरिहर विरि ञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृत पुण्यः प्रभवति ॥1॥

तनीयांसं पांसुन्तव चरण पङ्केरुह भवम्
विरिञ्चिस्सञ्चिन्वन् विरचयति लोकानविकलम्
वहत्येनं शौरिः कथमपि सहस्रेण शिरसाम्
हरस्संक्षुद्यैनं भजति भसितोद्धूलनविधिम् ॥2॥

अविद्याना मन्तस्तिमिर मिहिर द्वीपनगरी
जडानां चैतन्य स्तबक मकरन्द स्रुतिझरी
दरिद्राणां चिन्तामणि गुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपु वराहस्य भवति ॥3॥

त्वदन्यः पाणिभ्या मभयवरदो दैवतगणः
त्वमेका नैवासि प्रकटित वराभीत्यभिनया
भयात् त्रातुन्दातुं फलमपि च वाञ्छासमधिकम्

शरण्ये लोकानान्तव हि चरणावेव निपुणौ ॥4॥

हरिस्त्वामाराध्य प्रणत जन सौभाग्यजननीम्
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत्
स्मरोऽपि त्वान्नत्वा रतिनयन लेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥5॥

धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखाः
वसन्तस्सामन्तो मलय मरुदायोधनरथः
तथाप्येकस्सर्वं हिमगिरिसुते कामपि कृपाम्
अपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥6॥

क्वणत्काञ्चीदामा करिकलभ कुम्भस्तननता
परिक्षीणा मध्ये परिणत शरच्चन्द्रवदना
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तान्नः पुरमथितुराहो पुरुषिका ॥7॥

सुधासिंधोर्मध्ये सुरविटपि वाटी परिवृते

मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे
शिवाकारे मंचे परमशिव पर्यंक निलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्द लहरीम् ॥8॥

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि
मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥9॥

सुधाधारासारैश्चरण युगलान्तर्विगलितैः
प्रपंचं सिंचन्ती पुनरपि रसाम्नायमहसः
अवाप्य स्वां भूमिं भुजगनिभ मध्युष्ट वलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि ॥10॥

चतुर्भि श्श्रीकंठै शिवयुवतिभिः पंचभिरपि
प्रभिन्नाभि श्शंभोर्नवभिरपि मूलप्रकृतिभिः
चतुश्चत्वारिंशद्वसुदल कलाश्रत्रिवलय-
त्रिरेखाभिस्सार्धं तव शरणकोणाः परिणताः ॥11॥

त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिंचि प्रभृतयः
यदालोकौत्सुक्या दमरललना यान्ति मनसा
तपोभिर्दुष्प्रापामपि गिरिश सायुज्य पदवीम् ॥12॥

नरं वर्षीयांसन्नयन विरसन्नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः
गलद्वेणीबन्धाः कुचकलश विस्त्रस्तसिचयाः
हठात् त्रुट्यत्कांच्यो विगलित दुकूला युवतयः ॥13॥

क्षितौ षट्पंचाशद् द्विसमधिक पंचाशदुदके
हुताशे द्वाषष्टिश्चतुरधिक पंचाशदनिले
दिवि द्विष्षड्त्रिंशन्मनसि च चतुष्षष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादांबुजयुगम् ॥14॥

शरज्ज्योत्स्ना शुद्धां शशियुत जटाजूट मकुटां
वरत्रासत्राण स्फटिक घुटिका पुस्तककराम्
सकृन्नत्वा नत्वा कथमिव सतां सन्निदधते

मधुक्षीर द्राक्षामधुरिमधुरीणाः फणितयः ॥15॥

कवीन्द्राणां चेतः कमलवन बालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्
विरिंचि प्रेयस्यास्तरुणतर शृंगारलहरी
गभीराभिर्वाग्भिर्विदधति सतां रंजनममी ॥16॥

सवित्रीभिर्वाचां शशिमणि शिलाभंगरुचिभिः
वशिन्याद्याभिस्त्वां सह जननि संचिन्तयति यः
स कर्ता काव्यानां भवति महतां भंगिरुचिभिः
वचोभिर्वाग्देवी वदन कमलामोद मधुरैः ॥17॥

तनुच्छायाभिस्ते तरुण तरणि श्रीसरणिभिः
दिवं सर्वामुर्वीमरुणि मनिमग्नां स्मरति यः
भवन्त्यस्य त्रस्यद्वन हरिण शालीन नयनाः
सहोर्वश्या वश्याः कतिकति न गीर्वाण गणिकाः ॥18॥

मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम्

स सद्य स्संक्षोभन्नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥19॥

किरन्तीमंगेभ्यः किरण निकुरुंबामृतरसं
हृदि त्वामाधत्ते हिमकर शिलामूर्तिमिव यः
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधार सिरया ॥20॥

तटिल्लेखातन्वीं तपनशशि वैश्वानरमयीं
निषण्णां षण्णामप्युपरि कमलानान्तव कलाम्
महापद्माटव्यां मृदितमल मायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लाद लहरीम् ॥21॥

भवानि त्वन्दासे मयि वितर दृष्टिं सकरुणाम्
इति स्तोतुं वांछन् कथयति भवानि त्वमिति यः
तदैव त्वं तस्मै दिशसि निजसायुज्य पदवीं
मुकुन्द ब्रह्मेंद्र स्फुट मकुट नीराजितपदाम् ॥22॥

त्वया हृत्वा वामं वपुरपरि तृप्तेन मनसा

शरीरार्धं शंभोरपरमपि शंके हृतमभूत्
यदेतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिल शशि चूडाल मकुटम् ॥23॥

जगत्सूते धाता हरिरवति रुद्रः - क्षपयते
तिरस्कुर्वन्नेतत् स्वमपि वपुरीशस्तिरयति
सदापूर्वस्सर्वं तदिदमनुगृह्णाति च शिवः
तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलतिकयोः ॥24॥

त्रयाणान्देवानां त्रिगुणजनितानां तव शिवे
भवेत् पूजा पूजा तव चरणयोर्या विरचिता
तथा हि त्वत्पादोद्वहन मणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलित करोत्तंसमकुटाः ॥25॥

विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम्
वितन्द्री माहेन्द्री विततिरपि संमीलितदृशा
महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ ॥26॥

जपो जल्पश्शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्य क्रमण मशनाद्याहुतिविधिः
प्रणामस्संवेश स्सुखमखिल मात्मार्पणदृशा
सपर्या पर्यायस्तव भवतु यन्मे विलसितम् ॥27॥

सुधामप्यास्वाद्य प्रतिभय जरामृत्यु हरिणीं
विपद्यन्ते विश्वे विधि शतमखाद्या दिविषदः
करालं यत्क्ष्वेलं कबलितवतः कालकलना
न शंभोस्तन्मूलं तव जननि ताटंकमहिमा ॥28॥

किरीटं वैरिंचं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जंभारि मकुटम्
प्रणम्रेष्वेतेषु प्रसभ मुपयातस्य भवनं
भवस्याभ्युत्थाने तव परि जनोक्तिर्विजयते ॥29॥

स्वदेहोद्भूताभिर् घृणिभि रणिमाद्याभिरभितः
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः
किमाश्चर्यं तस्य त्रिनयन समृद्धिं तृणयतः

महासंवर्ताग्निर्विरचयति नीराजनविधिम् ॥30॥

चतुष्षष्ठ्या तंत्रैस्सकलमति सन्धाय भुवनं
स्थितस्तत्तत्सिद्धि प्रसव परतन्त्रैः पशुपतिः
पुनस्त्वन्निर्बंधादखिल पुरुषार्थैक घटना
स्वतन्त्रं ते तन्त्रं क्षितितल मवातीतरदिदम् ॥31॥

शिवश्शक्तिः कामः - क्षितिरथ रविश्शीतकिरणः
स्मरो हंसश्शक्रस्तदनु च परामार हरयः
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिताः
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥32॥

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनोः
निधायैके नित्ये निरवधि महाभोग रसिकाः
भजन्ति त्वां चिन्तामणि गुण निबद्धाक्ष वलयाः
शिवाग्नौ जुह्वन्तस्सुरभि घृत धाराहुति शतैः ॥33॥

शरीरं त्वं शंभोश्शशि मिहिर वक्षोरुहयुगं
तवात्मानं मन्ये भगवति नवात्मानमनघम्

अतश्शेष श्शेषीत्ययमुभय साधारणतया
स्थितस्संबन्धो वां समरस परानंद परयोः ॥34॥

मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायान्न हि परम्
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवति भावेन बिभृषे ॥35॥

तवाज्ञाचक्रस्थं तपन शशिकोटि द्युतिधरं
परं शंभुं वन्दे परिमिलित पार्श्वं परचिता
यमाराध्यन् भक्त्या रवि शशि शुचीनामविषये
निरालोकेऽलोके निवसति हि भालोकभुवने ॥36॥

विशुद्धौ ते शुद्धस्फटिक विशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमान व्यवसिताम्
ययोः कान्त्या यान्त्या श्शशिकिरण सारूप्यसरणेः
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥37॥

समुन्मीलत् संवित् कमल मकरंदैक रसिकं
भजे हंसद्वंद्वं किमपि महतां मानसचरम्
यदालापादष्टादश गुणित विद्यापरिणतिः
यदादत्ते दोषाद् गुणमखिलमद्भ्यः पय इव ॥38॥

तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयाम्
यदालोके लोकान् दहति महति क्रोधकलिते
दयार्द्रा या दृष्टि शिशिरमुपचारं रचयति ॥39॥

तटित्त्वन्तं शक्त्या तिमिर परिपन्थि स्फुरणया
स्फुरन्नानारत्नाभरण परिणद्धेन्द्र धनुषम्
तव श्यामं मेघं कमपि मणिपूरैक शरणं
निषेवे वर्षन्तं हरमिहिर तप्तं त्रिभुवनम् ॥40॥

तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरस महातांडवनटम्
उभाभ्यामेताभ्या मुदयविधि मुद्दिश्य दयया

सनाथाभ्यां जज्ञे जनक जननीमज्जगदिदम् ॥41॥

गतैर्माणिक्यत्वं गगनमणिभि स्सान्द्रघटितं
किरीटन्ते हैमं हिमगिरिसुते कीर्तयति यः
स नीडेयच्छायाच्छुरणशबलं चंद्रशकलं
धनु श्शौनासीरं किमिति न निबध्नाति धिषणाम् ॥42॥

धुनोतु ध्वान्तन्नस्तुलित दलितेन्दीवरवनं
घनस्निग्धश्लक्ष्णं चिकुरनिकुरुंबं तव शिवे
यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसः
वसंत्यस्मिन् मन्ये वलमथनवाटीविटपिनाम् ॥ 43 ॥

तनोतु क्षेमं नस्तव वदन सौंदर्यलहरी-
परीवाहस्त्रोत स्सरणिरिव सीमन्तसरणिः
वहन्ती सिन्दूरं प्रबल कबरी भारतिमिर-
द्विषां बृंदैर्बन्दीकृतमिव नवीनार्ककिरणम् ॥44॥

अरालै स्स्वाभाव्यादलिक लभस श्रीभिरलकैः
परीतं ते वक्रं परिहसति पंकेरुहरुचिम्

दरस्मेरे यस्मिन् दशनरुचि किंजल्करुचिरे

सुगन्धौ माद्यन्ति स्मरदहन चक्षुर्मधुलिहः ॥45॥

ललाटं लावण्यद्युति विमलमाभाति तव यत्

द्वितीयं तन्मन्ये मकुटघटितं चंद्रशकलम्

विपर्यासन्यासादुभयमपि संभूय च मिथः

सुधालेपस्यूतिः परिणमति राकाहिमकरः ॥46॥

भ्रुवौ भुग्ने किंचिद्भुवनभय भंगव्यसनिनि

त्वदीये नेत्राभ्यां मधुकर रुचिभ्यां धृतगुणम्

धनुर्मन्ये सव्येतर करगृहीतं रतिपतेः

प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमुमे ॥47॥

अहस्सूते सव्यं तव नयनमर्कात्मकतया

त्रियामां वामं ते सृजति रजनीनायकतया

तृतीया ते दृष्टिर्दरदलित हेमांबुजरुचिः

समाधत्ते संध्यां दिवस निशयोरंतरचरीम् ॥48॥

विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः

कृपाधाराधारा किमपि मधुराभोगवतिका
अवन्ती दृष्टिस्ते बहुनगर विस्तारविजया
ध्रुवं तत्तन्नाम व्यवहरण योग्या विजयते ॥49॥

कवीनां संदर्भस्तबक मकरंदैकरसिकं
कटाक्ष व्याक्षेप भ्रमरकलभौ कर्णयुगलम्
अमुंचंतौ दृष्ट्वा तव नव रसास्वादतरलौ
असूया संसर्गादलिक नयनं किंचिदरुणम् ॥50॥

शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा
सरोषा गंगायां गिरिशचरिते विस्मयवती
हराहिभ्यो भीता सरसिरुह सौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिस्सकरुणा ॥51॥

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुश्चित्त प्रशमरस विद्रावणफले
इमे नेत्रे गोत्राधरपति कुलोत्तंसकलिके
तवाकर्णाकृष्ट स्मर शर विलासं कलयतः ॥52॥

विभक्तत्रैवर्ण्यं व्यतिकरित लीलांजनतया
विभाति त्वन्नेत्र त्रितयमिद मीशानदयिते
पुन स्स्रष्टुं देवान् द्रुहिण हरि रुद्रानुपरतान्
रज स्सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव ॥53॥

पवित्रीकर्तुं नः पशुपति पराधीनहृदये
दयामित्रैर्नेत्रैररुण धवल श्यामरुचिभिः
नदश्शोणो गंगा तपन तनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि संभेदमनघम् ॥54॥

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहु स्सन्तो धरणिधर राजन्यतनये
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शंके परिहृत निमेषास्तव दृशः ॥55॥

तवापर्णे कर्णे जपनयन पैशुन्यचकिताः
निलीयन्ते तोये नियतमनिमेषा श्शफरिकाः
इयं च श्रीर्बद्धच्छद पुटकवाटं कुवलयं

जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥56॥

दृशा द्राघीयस्या दरदलित नीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकर निपातो हिमकरः ॥57॥

अरालं ते पाली युगलमगराजन्यतनये
न केषामाधत्ते कुसुमशर कोदंडकुतुकम्
तिरश्चीनो यत्र श्रवण पथमुल्लंघ्य विलसन्न्
अपांग व्यासंगो दिशति शरसन्धान धिषणाम् ॥58॥

स्फुरद्गंडाभोग प्रतिफलित ताटंकयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम्
यमारुह्य द्रुह्यत्यवनि रथमर्कैंदुचरणं
महावीरो मारः प्रमथपतये सज्जितवते ॥59॥

सरस्वत्या स्सूक्तीरमृतलहरी कौशलहरीः
पिबन्त्या श्शर्वाणि श्रवण चुलुकाभ्यामविरलम्

चमत्कार श्लाघाचलित शिरसः कुंडलगणः
झणत्कारैस्तारैः प्रतिवचन माचष्ट इव ते ॥60॥

असौ नासावंशस्तुहिनगिरि वंशध्वजपटि
त्वदीयो नेदीयः फलतु फलमस्माकमुचितम्
वहत्यन्तर्मुक्ता शिशिरकर निश्वासगलितं
समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः ॥61॥

प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता
न बिंबं तद्बिंब प्रतिफलन रागादरुणितं
तुलामध्यारोढुं कथमिव विलज्जेत कलया ॥62॥

स्मितज्योत्स्नाजालं तव वदन चंद्रस्य पिबतां
चकोराणामासीदतिरसतया चंचुजडिमा
अतस्ते शीतांशो रमृतलहरी माम्लरुचयः
पिबन्ति स्वच्छंदं निशि निशि भृशं कांजिकधिया ॥63॥

अविश्रान्तं पत्युर्गुणगण कथाम्रेडनजपा

जपापुष्पच्छाया तव जननि जिह्वा जयति सा
यदग्रासीनायाः स्फटिक दृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ॥64॥

रणे जित्वा दैत्यानपहृत शिरस्त्रैः कवचिभिः
निवृत्तैश्चंडांश त्रिपुरहर निर्माल्यविमुखैः
विशाखेंद्रोपेंद्रै श्शशिविशद कर्पूरशकलाः
विलीयन्ते मातस्तव वदन तांबूलकबलाः ॥65॥

विपंच्या गायन्ती विविधमपदानं पशुपतेः
त्वयारब्धे वक्तुं चलितशिरसा साधुवचने
तदीयैर्माधुर्यैरपलपित तंत्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम् ॥66॥

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया
करग्राह्यं शंभोर्मुखमुकुर वृन्तं गिरिसुते
कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितम् ॥67॥

भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती
तव ग्रीवा धत्ते मुखकमल नालश्रियमियम्
स्वत श्श्वेता कालागुरु बहुल जंबालमलिना
मृणाली लालित्यं वहति यदधो हारलतिका ॥68॥

गले रेखास्तिस्त्रो गतिगमक गीतैकनिपुणे
विवाह व्यानद्ध प्रगुण गुणसंख्या प्रतिभुवः
विराजन्ते नानाविध मधुर रागाकरभुवां
त्रयाणां ग्रामाणां स्थितिनियम सीमान इव ते ॥69॥

मृणाली मृद्वीनान्तव भुजलतानां चतसृणां
चतुर्भि स्सौन्दर्यं सरसिजभव स्स्तौति वदनैः
नखेभ्य स्संत्रस्यन् प्रथम मथनादन्धकरिपोः
चतुर्णां शीर्षाणां सममभय हस्तार्पणधिया ॥70॥

नखानामुद्योतैर्नव नलिनरागं विहसतां
कराणां ते कान्तिं कथय कथयामः कथमुमे
कया चिद्वा साम्यं भजतु कलया हन्त कमलं

यदि क्रीडल्लक्ष्मीचरणतल लाक्षारस चणम् ॥71॥

समं देवि स्कंद द्विपवदनपीतं स्तनयुगं

तवेदन्नः खेदं हरतु सततं प्रस्नुतमुखम्

यदालोक्याशंकाकुलित हृदयो हासजनकः

स्वकुंभौ हेरंबः परिमृशति हस्तेन झटिति ॥72॥

अमू ते वक्षोजावमृतरस माणिक्यकुतुपौ

न सन्देहस्पन्दो नगपति पताके मनसि नः

पिबन्तौ तौ यस्मादविदित वधूसंगरसिकौ

कुमारावद्यापि द्विरदवदन क्रौंचदलनौ ॥73॥

वहत्यंब स्तंबेरमदनुज कुंभप्रकृतिभिः

समारब्धां मुक्तामणिभिरमलां हारलतिकाम्

कुचाभोगो बिंबाधर रुचिभिरन्तश्शबलितां

प्रतापव्यामिश्रां पुरदमयितुः कीर्तिमिव ते ॥74॥

तव स्तन्यं मन्ये धरणिधर कन्ये हृदयतः

पयःपारावारः परिवहति सारस्वतमिव

दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता ॥75॥

हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसंगो मनसिजः
समुत्तस्थौ तस्माद्चलतनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति ॥76॥

यदेतत् कालिंदीतनुतर तरंगाकृति शिवे
कृशे मध्ये किंचिज्जननि तव यद्भाति सुधियाम्
विमर्दादन्योऽन्यं कुचकलशयोरन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम् ॥77॥

स्थिरो गंगावर्त स्स्तनमुकुल रोमावलिलता
कलावालं कुंडं कुसुमशर तेजोहुतभुजः
रतेर्लीलागारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धेर्गिरिश नयनानां विजयते ॥78॥

निसर्गक्षीणस्य स्तनतट भरेण क्लमजुषः
नमन्मूर्तेर्नारी तिलक शनकैस्त्रुट्यत इव
चिरन्ते मध्यस्य त्रुटित तटिनी तीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये ॥79॥

कुचौ सद्यस्स्विद्यत्तट घटित कूर्पासभिदुरौ
कषन्तौ दोर्मूले कनक कलशाभौ कलयता
तव त्रातुं भंगादलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवली वल्लिभिरिव ॥80॥

गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजात्
नितंबादाच्छिद्य त्वयि हरणरूपेण निदधे
अतस्ते विस्तीर्णो गुरुरय मशेषां वसुमतीं
नितंब प्राग्भारः स्थगयति लघुत्वं नयति च ॥81॥

करीन्द्राणां शुण्डान् कनक कदलीकांड पटलीं
उभाभ्या मूरुभ्या मुभयमपि निर्जित्य भवती
सुवृत्ताभ्यां पत्युः प्रणति कठिनाभ्यां गिरिसुते

विधिज्ञे जानुभ्यां विबुध करिकुंभ द्वयमसि ॥82॥

पराजेतुं रुद्रं द्विगुण शरगर्भौ गिरिसुते
निषंगौ जंघे ते विषमविशिखो बाढमकृत
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली
नखाग्रच्छद्मान स्सुरमकुट शाणैक निशिताः ॥83॥

श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मात शिशरसि दयया धेहि चरणौ
ययोः पाद्यं पाथः पशुपति जटाजूट तटिनी
ययोर्लाक्षालक्ष्मीररुण हरि चूडामणि रुचिः ॥84॥

नमोवाकं ब्रूमो नयन रमणीयाय पदयोः
तवास्मै द्वंद्वाय स्फुटरुचि रसालक्तकवते
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवन कंकेलितरवे ॥85॥

मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणकमले ताडयति ते

चिरादन्तश्शल्यं दहनकृत मुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा ॥86॥

हिमानीहन्तव्यं हिमगिरि निवासैकचतुरौ
निशायां निद्राणं निशि चरमभागे च विशदौ
वरं लक्ष्मीपात्रं श्रियमतिसृजन्तौ समयिनां
सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किम् ॥87॥

पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिन कमठी कर्परतुलाम्
कथं वा बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ॥88॥

नखैर्नाकस्त्रीणां करकमलसंकोचशशिभिः
तरूणां दिव्यानां हसत इव ते चंडि चरणौ
फलानि स्वस्थेभ्यः किसलय कराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ॥89॥

ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशीम्

अमन्दं सौंदर्य प्रकरमकरन्दं विकिरति
तवास्मिन् मन्दारस्तबकसुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरण ष्षड्चरणताम् ॥90॥

पदन्यास क्रीडा परिचयमिवारब्धु मनसः
स्खलन्तस्ते खेलं भवन कलहंसा न जहति
अतस्तेषां शिक्षां सुभगमणि मंजीर रणित-
च्छलादाचक्षाणं चरण कमलं चारुचरिते ॥91॥

गतास्ते मंचत्वं द्रुहिण हरि रुद्रेश्वरभृतः
शिवस्स्वच्छ च्छायाघटित कपट प्रच्छदपटः
त्वदीयानां भासां प्रतिफलन रागारुणतया
शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकम् ॥92॥

अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे ।
भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा ॥93॥

कलंकः कस्तूरी रजनिकर बिंबं जलमयं
कलाभिः कर्पूरैर्मरकत करंडं निबिडितम्
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निबिडयति नूनं तव कृते ॥94॥

पुरारातेरन्तःपुरमसि ततस्त्वच्चरणयोः
सपर्या मर्यादा तरल करणानामसुलभा
तथा ह्येते नीताश्शतमख मुखा स्सिद्धिमतुलां
तव द्वारोपान्तस्थितिभि रणिमाद्याभिरमराः ॥95॥

कलत्रं वैधात्रं कतिकति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासंगः कुरवकतरो रप्यसुलभः ॥96॥

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदः
हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम्
तुरीया कापि त्वं दुरधिगम निस्सीममहिमा

महामाया विश्वं भ्रमयसि परब्रह्ममहिषि ॥97॥

कदा काले मातः कथय कलितालक्तक रसं
पिबेयं विद्यार्थी तव चरणनिर्णेजनजलम्
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुख कमल तांबूलरसताम् ॥98॥

सरस्वत्या लक्ष्म्या विधिहरि सपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा
चिरं जीवन्नेव क्षपितपशु पाशव्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद्भजनवान् ॥99॥

प्रदीपज्वालाभिर्दिवसकर नीराजनविधिः
सुधासूतेश्चंद्रोपल जल लवैरर्घ्यरचना
स्वकीयैरंभोभि स्सलिलनिधि सौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम् ॥100॥

॥ इति श्रीमत्परमहंस परिव्राजकाचार्यस्य
श्रीमच्छङ्करभगवतः कृतौ सौन्दर्यलहरी संपूर्णा ॥
॥ हरिःॐ तत्सत् ॥




WE APPEAL TO THOSE WHO ARE ABLE TO EXTEND FINANCIAL SUPPORT TOWARD THE DAY-TO-DAY ADMINISTRATION OF OUR VEDA PATHASHALA AND THE UPCOMING CONSTRUCTION OF ITS NEW PREMISES. MAY YOU BE BLESSED WITH THE GRACE OF VEDAPURUSHA.